International Journal of Academic Research and Development
ISSN: 2455-4197, Impact Factor: RJIF 5.22
www.academicsjournal.com
Volume 2; Issue 4; July 2017; Page No. 859-860

# भाष्यानुगुणं संज्ञाधिकारस्य प्रयोजनं प्रत्याख्यानश्च

**डॉ॰ शैलेन्द्र सिंह**

प्रवक्ता संस्कृतम्, हिसारनगरम्, हरयाणा, भारत।

**प्रस्तावना**

आचार्यः पतञ्जलिः स्वकीय अनुपमव्याकरणग्रंथस्य महाभाष्यस्य कृते सहस्त्रवर्षैः वैयाकरणानां समलोचकानां विदुषां पण्डितानाञ्च अन्वेषणविषयः वर्तते। अष्टाध्याय्युपरि लिखितस्यास्य ग्रन्थस्य वैशिष्ट्यं जानन्ति सर्वे वैयाकरणाः। भौतिके संसारे सूर्यस्य महत्त्वमिव व्याकरणजगति महाभाष्यस्यापि वर्तते स्वकीयैव महिमा। यद्यपि कालप्रभावेणास्य ग्रन्थस्य लोपस्यापि उल्लेखः लभ्यते तथापि अनेन ग्रन्थेन स्वगरिम्णा पुनरपि एतादृशी प्रतिष्ठा लब्धा यत् स्वामिना विरजानन्देन सादरमुद्घोषितम् –

अष्टाध्यायीमहाभाष्ये द्वे व्याकरणपुस्तके।
ततोऽन्यत् पुस्तकं यत्तु तत्सर्वं धूर्तचेष्टितम्।।[1]

महाभाष्यं पाणिनीयतन्त्रस्य असाधारणः विशालकायश्च ग्रन्थः वर्तते। अस्मिन् ग्रन्थे पाणिनीयाष्टाध्यायीसूत्राणां कात्यायनस्य वार्तिकाणाञ्च विस्तृतं भाष्यं वर्तते। अत्र हि पाणिनेः सिद्धान्तानां पुष्टिः कात्यायनस्य वार्तिकाणाञ्च समालोचना वर्तते। आचार्यः प्रथमं स्वयमेव संदेहमुपस्थापयति पुनतत्समाधानं कृत्वा तं सिद्धान्तं गौरवमण्डितञ्च करोति।

पञ्चाशीतिषु आहिनकेषु विभक्तेऽस्मिन् ग्रन्थे काऽपि अपूर्वा प्रतिपादन– शैली दरीदृश्यते। भाषा एतादृशी सरला विद्यते यत् सामान्यसंस्कृतज्ञोऽपि अर्थज्ञाने समर्थः। एतादृशं भाष्याशयं गम्भीरं यत् केषुचित् स्थलेषु विदुषामपि मतिर्कुण्ठिता जायते। यथा चोक्तं आचार्यकैयटेन –

भाष्याब्धिः क्वाति गंभीरः क्वाहं मंदमतिस्ततः।
छात्राणामुपहास्यत्वं यास्यामि पिशुनात्मनाम्।।[2]

अस्यैवाब्धेः तरङ्गाणां कोऽपि बिन्दुः महाभाष्यस्य प्रथमाध्याये प्रथमपादे तृतीयाह्निकमादाय अत्र प्रस्तूयते मया –

**संज्ञाधिकारस्य प्रयोजनं प्रत्याख्यान**ञ्च **:**

तृतीयाह्निके 'वृद्धिरादैच्'[3] इत्यस्य सूत्रस्य विमर्शसन्दर्भे पतञ्जलिः शङ्कां समुपस्थापयति – (i) यदाचार्येण प्रतिपादितम् 'अथ संज्ञा' इत्यादि निर्देशद्वारा संज्ञाधिकारः नैव कृतः वर्तते तत्कथं ज्ञास्यामः यदयं संज्ञानामुल्लेखः क्रियते।

(ii) शङ्का इयमस्ति यत् वृद्धिः, आदैच् च इत्यनयोः पदयोः मध्ये संज्ञा का च संज्ञी।

**प्रथमाक्षेपस्य समाधानं :**

उत्तरपक्षे आचार्यः समाधानं ददाति – 'आचार्याचारात् संज्ञासिद्धिः।' 'मिदेर्गुणः', 'मृजेर्वृद्धिः' इत्यादिषु सूत्रेषु 'गुणशब्दं' 'वृद्धिशब्दं' च संज्ञारूपेण प्रयुङ्क्ते। 'सिचि वृद्धिः परस्मैपदेषु' (7/2/1), 'अचोञ्णिति'(7.2.115) इत्यादिषु सूत्रेषु आ, ऐ, औ इत्येतां वर्णानामुदाहरणं दीयते। ये प्रतीयन्ते ते संज्ञिनः यया प्रत्यायते सा संज्ञा इत्यनेनापि व्यवहारेण वृद्धि–शब्दः एकात्र संज्ञा।

(2) अन्यदपि लोके मातापितरौ पुत्रस्य देवदत्त, यज्ञदत्त इत्यादि नामानि कुर्वन्ति। तेषां व्यवहारेणान्येऽपि जानन्ति इयमस्य संज्ञेति। वेदे च याज्ञिकाः संज्ञां कुर्वन्ति 'स्फ्यो यूपश्चषालः' इति तेषां व्यवहारेण अन्येऽपि जानन्ति इयमस्य संज्ञेति एवमेव प्रकृतसूत्रविषयेऽपि स्यात्।

**द्वितीयाक्षेपे समाधानम् :**

**प्रथमः तर्कः –** संज्ञासंज्ञिनश्चासन्देहः इति वचनस्य नास्ति आवश्यकता। प्रथमं तु इदमाचार्याचारेणैव सिद्धः पुनः अनाकृतिः संज्ञा आकृतिमन्तः संज्ञिनः। लोकेऽपि आकृतियुक्तस्य मांसपिण्डस्य 'देवदत्त' इत्यादि संज्ञा क्रियते। एवमेव 'वृद्धिः' इत्यस्याः अपि संज्ञायाः आकृतिः नास्ति। अतव एव 'वृद्धिः' संज्ञा।

**द्वितीयः तर्कः –** केनचित् चिह्नेन सूच्यते यदनेन चिह्नेनयुक्ता संज्ञा भविष्यति। यदुक्तं पतञ्जलिनाः 'आचार्याचाराद् संज्ञासिद्धिः' तत् नैव युक्तम्। यतः "तमेवोपलभ्य अगमकं ते सूत्रं इति तस्यैव पुनः प्रमाणीकरणमित्येतदयुक्तं। आपरितुष्यन् खल्वपि भवाननेन परिहारेण 'अनाकृतिर्लिङ्गेन वा' इत्याह।"

चिह्नेन सूचनाविधौ तु लाघवं भविष्यति। न च अनुबन्धानां लोपस्य इत्संज्ञा वचनस्यापि कथनस्य आवश्यकता भविष्यति। किन्त्वाचार्यमते एतदपाणिनीयत्वादसिद्धम्। यतोहि–"प्रमाणभूत आचार्यः दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म। तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुं किं पुनरियता सूत्रेण[4]।" अत एव एतौ संज्ञासंज्ञिनावेव।

पुनः आचार्यः पूर्वपक्षमुपस्थापयति किमत्र वृद्धिः, आदैच् च इत्यनयोः पदयोः साधुत्वं तु न क्रियते? किन्त्विदमपि अन्यत्र कृतमस्ति। धातुपाठे 'वृध्' धातोः उपदेशः लभ्यते। आ ऐ औ इत्येते वर्णाः अपि अक्षरसमाम्नाये उपदिष्टाः सन्ति।

**तृतीयतर्कः** – किं पुनः प्रयोगनियमः क्रियते वृद्धिशब्दात्परे आदैचः प्रयोक्तव्याः इति। किन्त्वस्मिन् शास्त्रे प्रयोगनियमः तु नास्ति अपितु साध्वनुशासनमेव। वक्तुः विवक्षया च शब्दानुपूर्वी भवति। तद्यथा–आहर पात्रम् अथवा पात्रमाहर इति।

**चतुर्थः पंचमश्च तर्कः –** किं तर्हि एते आदेशाः सन्ति अथवा आगमाः एव सन्ति। यतोहि न आदेशाः आगमाश्च षष्ठीनिर्दिष्टस्यैव सन्ति। न चात्र षष्ठीनिर्देशः।

**शष्ठतर्कः –** अपि चात्र समानाधिकरणमेकविभक्तित्वञ्च दृश्यते। एतच्च द्वयोरेव भवति – विशेषणविशेष्ययोः, संज्ञासंज्ञिनोः।

विशेषण–विशेष्यभावस्तु लोकप्रसिद्धानामेव भवति। आदैच् पदस्यार्थः तु वैयाकरणा एव जानन्ति। अत एव निस्सन्देह एते संज्ञासंज्ञिनः एव। एवमपि नास्ति आवश्यकता संज्ञाधिकारस्य।

ततः अस्मिन् प्रसंगे का संज्ञा कः संज्ञी प्रश्नोऽयम् अवशिष्यते। यदा पदद्वयं समानाक्षरं भवेतां तदा तु प्रश्नोऽयं सर्वथा योग्य अन्यथा तु यल्लघु सा संज्ञा यद्गुरुः सः संज्ञी यतः 'लध्वर्थं हि संज्ञाकरणम्'।[5]

अन्यच्च संज्ञिनः आकृतिमन्तः भवन्ति संज्ञा तु अनाकृतिरेव भवति। यथा च लोके आकृतिसंपन्नस्य मांसपिण्डस्य 'देवदत्त' इत्यादि संज्ञा क्रियते।

पुनरपि लोके संज्ञाया एव आवृत्तिर्भवति न तु संज्ञिनः। देवदत्तशब्दस्य पुनरावृत्तिः न तु मांसपिण्डस्य। एकमेव वृद्धिः पदं पुनरावर्तते।

अन्यथा पूर्वोच्चारितः संज्ञीर्भवति परोच्चारिता संज्ञा भवति। यतोहि वैयाकरणाः अपि सांख्यरथसत्कार्यवादं स्वीकुर्वन्ति। कर्त्ता पूर्वं भवति कार्यन्तत्पश्चाद् भवति। यथा च लोके पूर्वं बालकरस्य जन्म भवति तत्पश्चादेव नामकरणं भवति। पाणिनीये शास्त्रेऽपि – अदेङ् गुणः[6] हलोऽनन्तराः संयोगः,[7] मुखनासिकावचनोऽनुनासिकः,[8] इत्यादिषु सूत्रेषु पश्चाद् पठिताः गुण–संयोग–अनुनासिकादयः संज्ञाः भवन्ति। कार्यिरूप संज्ञिद्वारा संज्ञियाः बोधो भवति। अत एव नास्ति अत्र सन्देहः।

परन्तु परोच्चारिता संज्ञा इति नियमः 'वृद्धिरादैच्' इत्यस्मिन् सूत्रे तु घटितो न भवति।

**विषयेऽस्मिन्नाचार्यः समाधानं ददाति–**

अत्र वृद्धिपदं मंगलार्थम्। मंगलाचरणस्य परंपरा भारतवर्षेऽतीव प्राचीना वर्तते। ग्रन्थकारः ग्रन्थारम्भे कल्याणाय ईश्वरं स्मरति। स्मरणात्मकं कार्यं तु लेखकः उल्लेखपूर्वकमपि कर्तुं शक्नोति किन्तु अध्येताऽपि इत्यस्याः परम्परायाः विस्मरणं न कुर्यात् एतदर्थं ग्रन्थारम्भे मंगलश्लोकः पदं वा किंचित् लिखति। अतः आचार्यस्य मतमिदं समीचीनमेव यत् –

"एतदेकमाचार्यस्य मंगलार्थं मृष्यताम्। मौंलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते। मङ्गलादीनि हि शास्त्राणि प्रयन्ते वीरपुरुषकाणि भवन्त्यायुष्मत्पुरुषकाणि चाध्येतारश्च वृद्धियुक्ता यथा स्युरिति।"

एवमपि केषांचन विदुषां मतमिदं यत् कदाचितेतद् सूत्रं पाणिन्यपेक्षा पूर्वाचार्येण प्रणीतं स्यात्। 'पाणिनिना प्रोक्तं पाणिनीयम्' इत्यनुसारेण पाणिनिव्याकरणं प्रोक्तः ग्रन्थः वर्तते। पाणिनिना पूर्वसूत्रं क्रमविपर्ययमकृत्वैव गृहीतं यतः एतद् मंगलकारकं मन्यते। प्रोक्तग्रन्थेषु पूर्वाचार्याणां तादृगैव शब्दावलिग्रहणं अभ्युदयकारि भवतीति।[9]

संज्ञाधिकारकरणे अयमपि दोषः यदाचार्येण सर्वाणि संज्ञासूत्राणि एकस्मिन्नेव स्थाने नैव पठितानि। अष्टमध्यायेऽपि अध्याये 'तस्य परमाम्रेडितम्' (5.1.2) इत्यादयः संज्ञाः सन्ति। तत्रापि अयमधिकारोऽनुवर्त्यः स्यात्।

संज्ञाधिकारस्य संज्ञासंज्ञिनश्च असन्देहविषयकस्य उपर्युक्तस्य विवेचनस्यानावश्यकतां निरूपयन् भाष्यकारः पुनः कथयति– अयं प्रयासोऽस्थाने एव क्रियते यतः इदं सिद्धान्तं लोकाद् न हि भिद्यते। यदीदं लोकाद् भिन्नं भवेत् तदा तु प्रयत्नसाध्यं स्यात्। यथा–लोके अगोज्ञाय कोऽपि गां संक्थनि कर्णे वा ग्रहीत्वा उपदेशं करोति 'इयं गोः' इति इत्यनेन सः जानाति यदि समस्याः संज्ञेति। यद्येवं कथितं स्यात् पूर्वजनैः एतज्ज्ञापितं वर्तते तर्हि प्रकृत विषयेऽपि एवं भवति।

यदि चेत् कथ्यते यत् गोविषये अनभिज्ञाय उपदेशः क्रियते तस्यापि गोरिति ज्ञाने जाते सति उपदेशः कृतः मन्यते। एवं शास्त्रेऽपि आ, ऐ, औ इत्येषां वृद्धिसंज्ञायाश्च संबन्धः पूर्वमेव सिद्धः। तस्मादपि नास्त्यावश्यकता– –संज्ञाधिकारस्य संज्ञासंज्ञिनः पृथक् कारणस्य वा।

अधुना आचार्यः वृद्धयादिषु संज्ञासु प्राप्तस्येतरेतराश्रय दोषस्य समाधानं करोति –

**"सतो वृद्धयादिषु संज्ञाभावात्तदाश्रय इतरेतराश्रयत्वादप्रसिद्धिः[10]।** (1)

अर्थात् आ ऐ औ इत्येतेषां सज्ञिनां भूते सति वृद्धिसंज्ञा भविष्यति। वृद्धिसंज्ञायां सति आ, ऐ, औ भविष्यन्ति। इत्यनेन इतरेतरात्तयः दोषाः प्राप्नुवन्ति। यतोहि इतरेतराश्रयाणि कार्याणि नैव सिध्यन्ति। यथा नौर्नावि बद्धा अन्यत्राणं कर्तुमसमर्था भवति। एवम् इतरेतराश्रये सति आदैचां वृद्धिसंज्ञा नैव भवति।

किन्तु कदाचिदितरेतराश्रयाणामपि कार्याणि दृश्यन्ते। यथा – 'नौः शकट वहति, शकटं च नावं वहति।' परं तत्र जलं स्थलं वा काऽपि विशेषता भवति।

**समाधानम् :**

नास्ति व्याकरणशास्त्रे तु एतादृशी इतरेतराश्रयता। यतोहि वैयाकरणाः शब्दं नित्यं मन्यन्ते अत एव पूर्वेणैव विद्यमानानामादैचां वृद्धिसंज्ञा भवति।

तत्रापि पुनः प्रश्नो यदि शब्दाः नित्याः एव सन्ति तत्किमर्थं शास्त्रमिति? अस्य उत्तरमिदं यत् शास्त्रस्य महत्ता निवर्तकत्वाद् सिद्धा यतः शब्दानां साध्वनुशासनत्वमेव व्याकरणत्वं –

> "साधुत्वज्ञानविषयांसैषा व्याकरणस्मृतिः'।"
> अथ च "यद्यपि बहुनाधीषे तथापि पठ पुत्र व्याकरणम्।
> स्वजनो श्वजनो माभूत् सकलं शकलं सकृत् शकृत्।।[11]

पाणिनीयशास्त्रे 'मृजेर्वृद्धिः' (4.2.114) इत्यनेन सूत्रेण 'मृज्' धातोः सर्वेषु प्रत्ययेषु वृद्धिः विधीयते। सूत्रेण अशुद्धरूपाणां निवृत्तिः कृत्वा 'मार्ष्टि' इत्यादयः साधुरूपाणि सिध्यन्ति।

इत्थं संज्ञाधिकारस्यनावश्यकता सिद्धा, शास्त्रस्य प्रयोजनं च सिद्धम्।[12]

**निष्कर्षरुपेण**

तृतीयाह्निके वृद्धिरादैच् सूत्रस्य अनेकपक्षेषु विचारः कृतः वर्तते। एतस्मिन् प्रसंगे आचार्येण पतञ्जलिना संज्ञाधिकारस्य आवश्यकता अस्ति न वा इति विषयमादाय पुनः संज्ञाधिकार–ग्रहणस्य अनावश्यकता साधिता। आचार्येण समस्याद्वयं प्रथमं प्रस्तुता –

प्रथमा– 'अथ संज्ञा' इत्यादि वाक्येन संज्ञाधिकारः करणीयः।

द्वितीया– वृद्धिः आदैच् च इत्यनयोः पदयोः मध्ये का संज्ञा ?

पुनः क्रमशः द्वयोः पक्षयोः संदर्भे पूर्वपक्ष–उत्तरपक्षरूपाभ्यां तर्कानुपस्थाप्य अन्ते पाणिनेरेव कृतेः मण्डनं कृतम्।

संशोधनं परिवर्तनं वा तत्रैवापेक्ष्यते यत्र काऽपि त्रुटिः भवेत्। यत्र त्रुटिरेव नास्ति तत्र परिवर्तनस्यावश्यकतापि नास्ति। यत्र संशोधनस्य परिवर्तनस्य वा आवश्यकता नास्ति तदेव विधानं सर्वोत्तमं भवति। अनेन पाणिनिना कृतस्य नियमस्य महिमा प्रदर्शितः।

**संदर्भ**


1. व्याकरणशास्त्रस्येतिहासः, पृ॰ 50
2. अष्टाध्यायी और उनके भाष्यकार पतंजलि, डॉ॰ रामसागर, पृ॰ 104
3. अष्टाध्यायी, 1.1.1 सूत्र
4. (क) महा॰ प्र॰ आ॰ प्र॰ पा॰, तृ॰ आ॰, पृ॰ 126
   (ख) तदेव, पृ॰ 127
5. महा॰, पृ॰ 127 व्या॰ आ॰ चा॰ शा॰
6. अष्टाध्यायी, 1.1.2
7. तदेव, 1.1.4
8. तदेव, 1.1.5
9. महा॰ प्र॰ अ॰, प्र॰ वा॰, तृ॰ आ॰, पृ॰ 130, आ॰ चा॰ शा॰
10. महा॰, प्र॰ आ॰ प्र॰ पा॰, तृ॰ आ॰, भा॰ वा॰ 9, पृ॰ 245, वि॰ या॰ महा॰
11. उद्धरण–सं॰ नि॰ श॰ पृ॰ 5 वा॰ प॰।
12. तदेव, सं॰ नि॰ श॰, पृ॰ 7


[1]. उद्धरण–सं॰ नि॰ श॰ पृ॰ 5 वा॰ प॰।
[2]. उद्धरण, सं॰ नि॰ श॰, पृ॰ 7